क्रं. ४४

सत्य विनायक

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

॥अथसत्यविनायकपूजाप्रारंभः॥वासिद्धिविनायकः॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

सत्यवि॰
१

श्रीगणेशायनमः अथयंत्रदेवताः मध्येमयूरेशायनमः॥ वामांगेसिद्ध्येनमः दक्षि
णांगेबुद्ध्येनमः पुरतोलक्षलाभाभ्यां॰ संमुखेमूषकमयूराभ्यां॰ पृष्ठे मोदप्रमो
दादिगणेभ्यो॰ वामांगेपुरतोमुद्गलाभ्यां॰ वामांगेपुरः शुकाय॰ पूर्वस्यांधर्ममंड
पेविष्णवे॰ दक्षिणस्यां अर्थमंडपेशंभवे॰ पश्चिमस्यां काममंडपे महाशक्त्यै॰ उ
त्तरस्यांमुक्तिमंडपेसूर्यायनमः १२ अष्टविनायकेभ्यो॰ अष्टमातृभ्यो॰ अष्टभैर
वेभ्यो॰ वामांगे संकष्टचतुर्थ्यै॰ दक्षिणांगे शुक्लचतुर्थ्यै॰ पृष्ठेशम्यै॰ पूर्वभागे
मंदाराय॰ तस्मिंनेवदूर्वायै॰ दिक्पालेभ्यो॰ शतकोटिगणेभ्यो॰ २२ एतेमुख्य
गर्भागारवासिनः तत्पूर्वद्वारे द्विभुजगणनाथाय॰ वामांगे मार्जालिदेव्यै॰
समीपे लक्ष्मीनारायणाभ्यां॰ दक्षिणद्वारे द्विभुजगणनाथाय॰ वामांगेवी राम
रजादेव्यै॰ समीपे मुक्तिदेव्यै॰ समीपेपार्वतीशंकराभ्यां॰ ततः पश्चिमद्वारे १

(2A)

द्विभुजगणनाथाय॰वामांगे आश्रमदेव्यै॰।।समीपेरतिकामाभ्यां॰।। उत्तरद्वारे
द्विभुजगणनाथाय॰ वामांगे मुक्तिदेव्यै॰ तत्समीपे महीवराभ्यां॰ ३४ ।। तत्र ग
र्भागारे गणेशमुद्गलादिभ्यो॰ ३५ तत्पूर्वभागे बुद्ध्यै॰ तद्दक्षिणभागे प्रमोदा
दिगणेभ्यो॰ तत्पश्चिमभागे सिद्ध्यै॰ तदुत्तरभागे चतुःषष्टियोगिनीभ्यो॰
गर्भागाराद्बहिश्च पूर्वस्यां नग्नभैरवायनमः।। तद्दक्षिणभागे नीलकंठाय॰
तत्पश्चिमभागे नागेशायन॰ तदुत्तरे भीमेश्वराय॰ ४३ अथतीर्थानि।।स
र्वतीर्थायनमः।।गणेशतीर्थाय॰ भामतीर्थाय॰ ऋषितीर्थाय॰ व्यासतीर्था
य॰।। कपिलतीर्थाय॰ सर्वअघघ्नतीर्थाय॰ सर्वपुण्यप्रदतीर्थाय॰ इत्येता
देवताः सर्वाः पूजयेद्यंत्रमध्यतः।। सिद्धिविनायकव्रते सिद्धिदास्ताभवं
तिहि।। हेरंबोवतुमां अथब्रह्मांडपुराणोक्त श्रीसिद्धिविनायकव्रतपूजा

सत्यविना
२
(3)

लिख्यंते तत्रपुराणांतर्गतकथोक्तानिपूजाक्रमोपयुक्तानिकानिचिद्वचनानिसं
गृह्य लिख्यंते श्रीकृष्णउवाच अहंवदामितेप्रीत्या विधानंव्रतसंभवं॥ यत्नःपु
ष्टिमतेजन्मवैशाखपूर्णिमादिने १ तस्यांवरंचतुर्थ्यांवाभौमेवाभृगुवासरे॥
कस्मिंनपिशुभदिनेप्रातःसंकल्पयेद्व्रतं २ तिलामलककल्केनस्नायान्नित्य
विधिंचरेत्॥ पुनःप्रदोषसमयेव्रतीस्नानंचरेत्प्रिये ३ स्वस्तिवाच्यतुसंपूज्य
खेटान्गोमयशोधिते॥ रंगवल्लियुतेदेशेकदलीस्तंभमंडिते ४ सुगंधिनाना
पुष्पाढ्यांआदर्शावलिविराजितां॥ कुर्यान्मंडपिकांचारुतन्मध्येकलशंन्यसे
त्॥ ५ तत्रवैनायकंयंत्रंचतुर्द्वारविराजितं॥ लक्ष्मीनारायणौचैवपार्वतीपर
मेश्वरौ ६ महीवराहकौशक्तिमदनौकोणदिक्क्रमात्॥ लिखेदष्टदलंवापिदेशि राम
काज्ञामवाप्यच ७ अष्टगंधेनविलिखेद्रक्तचंदनतोपिवा॥ पूजाद्रव्याणिसं २

(3A)

प्रोक्षमध्ये सिद्धिविनायकं ८ अधिकारानुसारेण पूजयेद्वैदिकादिभिः॥ मंत्रैः षोडश
भिश्चैवोपचारैस्तत्र कल्पयेत् ९ गोधूमचूर्णसंयुक्तान् शर्करापरिमिश्रितान्॥ न
सपादक्षीरखर्वोत्थपाकसंभवमोदकान्॥ १० यथाविभवतो नानापक्वान्नानि निवेद
येत्॥ नैवेद्यार्थं ततो बीजापूरं मुखविशुद्धये ११ शमीमंदारदूर्वाभिर्मंत्रपुष्पां
जलिं न्यसेत्॥ श्रुत्वा कथां समभ्यर्च्य गंधमाल्यादिभिर्द्विजान्॥ १२ पतिव्रत्य
स्त्रियोप्येवं हरिद्राकुंकुमादिभिः॥ यथा द्विजान्भोज्य पश्चाद्बंधुजनैः सह १३
स्त्रीभिः प्रसादं संभुज्य ततो जागरणं चरेत्॥ शास्त्रवादैर्नृत्यगीतैर्नृपकैर्विवि
धैरपि॥ १४ बालानां दंडलीलाभिः खेलैर्बुद्धिबलादिभिः॥ स्वयं समा
हितमना यावत्सूर्योदयो भवेत् १५ एवं व्रतं प्रकुर्वाणः सद्यः फलमवाप्नु

सत्यवि० यात् ॥ धनंधान्यंपशून्दारान्सुतमायुर्निरोगतान् ॥ १६ मानंसुविद्यांलभतेनिःकामो
३ मोक्षमाप्नुयात् ॥ इतिब्रह्मांडपुराणेसत्यविनायकपूजाविधिः ॥ अथप्रयोगः ॥ स
(५) माहितमनः यजमानउक्तदिनेप्रातःव्रतंसंकल्प्यतिलामलककल्केनस्नात्वानित्यविधिं
समाप्यव्रतीपुनःप्रदोषसमयेसभार्यःस्नात्वासांध्यंविधिंसंसाध्यआचम्यदेश
कालौसंकीर्त्यश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंअस्माकंसकुटुंबानांक्षेमस्थै
र्यआयुरारोग्यैश्वर्याभिवृद्ध्यर्थंद्विपदचतुष्पदादीनांशांत्यर्थंपुष्ट्यर्थंतुष्ट्य
र्थंसमस्तमंगलावाप्त्यर्थंसमस्तपापक्षयपूर्वकसकलाभ्युदयार्थंचस्थिरल
क्ष्मीप्राप्त्यर्थंपरमंत्रयंत्रतंत्रषट्प्रयोगादिपरविद्यास्तंभनस्वविद्याप्रकटन राम
पूर्वकसकलरिपुनिर्बर्हणद्वारामनेप्सितकामनासिद्ध्यर्थंश्रीसिद्धिविना ३

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com